International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 207-209
© 2026 IJMH
www.themultijournal.com

Received: 26-03-2026
Accepted: 06-04-2026
Publish : 07-04-2026

**श्रीमदन-पात्र:**
शोधछात्र:,संस्कृत-विभाग:,
विद्यासागरविश्वविद्यालय:,
मेदिनीपुरम्,पश्चिमबङ्गल:।

**Correspondence:**
**श्रीमदन-पात्र:**
शोधछात्र:,संस्कृत-विभाग:,
विद्यासागरविश्वविद्यालय:,
मेदिनीपुरम्,पश्चिमबङ्गल:।

# तर्कामृते मङ्गलाचरणगतविशिष्टपदानां चषकादिटीकालोकेन व्याकरणगतसमीक्षणम्

**श्रीमदन-पात्र:**

**शोधसार:**

तर्कामृतगतमङ्गलाचरणे उल्लिखितानां विशिष्टपदानां चषकतरङ्गिणीटीकालोकेन व्याकरणगत-समीक्षणम्। 'चरणाम्बुजम्', 'हृत्पद्मम्', 'तर्कामृतम्' इति उल्लिखितसमस्तपदानां समास: किंविध: स्यात्, उपमितकर्मधारय: उत रूपककर्मधारय: अथवा उभयविध: ? इति चेत् अत्र विचार्य्यते।

**कूटशब्दा:** मङ्गलाचरणम्,चरणाम्बुजम्, हृत्पद्मम्, तर्कामृतम्, समास:।

**उपक्रम:**

सनातन-भारतवर्षे संस्कृतपरम्परायां कस्यचित् कर्मण: प्राक् मङ्गलाचरणम् एकं महत्वपूर्णम् अङ्गम्। अस्यां भावनायां भावनान्वितं भूत्वा ग्रन्थकारेण जगदीशतर्कालङ्कार: तस्य ग्रन्थस्यादौ भगवत: विष्णो: चरणाम्बुजे प्रणामं निवेदितवान्। यथा- "ब्रह्माद्या निखिलार्चितास्त्रिदशसन्दोहा: सदाभीष्टदा अज्ञानप्रशमाय यत्र मनसो वृत्तिं समस्तां दधु:।

**श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परं**

**हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते॥"**[1]

अर्थात् सर्वेषां पूजनीया: अपि च सर्वदा अभीष्टप्रदा: ये ब्रह्मादि देवा: सन्ति ते अज्ञानविनाशार्थं यत्र सर्वां मनोवृत्तिं स्थापयन्ति, यत् संसारदु:खध्वंसस्य एकमात्रम् उत्कृष्टकारणस्वरुपं तत् श्रीविष्णो: पादपद्मम्, तं हृत्पद्मे स्थापयित्वा ग्रन्थकार: तर्कामृतम् इति न्यायवैशेषिकयो: समानतन्त्रदर्शनग्रन्थं रचितवान्। अस्मिन् मङ्गलाचरणे 'त्रिदश:' 'सन्दोहा:' 'अज्ञानप्रशमाय' 'चरणाम्बुजम्' 'हृत्पद्मे' 'तर्कामृतम्' इत्यादीनां पदानां व्याख्यानकाले टीकाकारा: स्वस्वाभिमतं तेषां टीकाग्रन्थेषु उल्लिखितवन्त:। अत्र 'त्रिदश'-शब्दस्यार्थ: देवता। त्रीन् तापान् दशति नाशयतीति विग्रहेण "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्"(वा) – इत्यनेन उत्तरपदलोपीकर्मधारयसमासे त्रिदश-पदमिदं सिद्धति। अस्य शब्दस्योल्लेखं महाभारतस्य प्रथमपर्वणि तृतीयपर्वणि च प्राप्यते। यथा –

**"न्यवसत् परमप्रीतो ब्राह्मा च त्रिदशै: सह।"** [2]

**"तत: स कौवरो राजा विहृत्य त्रिदशा निशा:"**[3]

महाकविना कालिदासेनापि 'त्रिदश'-शब्दस्योल्लेख: 'कुमारसम्भवम्' इति महाकाव्ये कृत:- " तस्मिन्मघोनस्त्रिदशान्विहाय सहस्रमक्ष्णां युगपत्पपात।

**प्रयोजनाऽपेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु॥"** [4](तृतीयसर्ग:)।

अत्र सञ्जीवनीटीकाकारेण त्रिदशशब्दस्यार्थ: 'देवान्' इति कृत:।

मङ्गलाचरणे 'सन्दोहा:' पदमिदं सम्-उपसर्गपूर्वकात् दुह्-धातो: घञ्-प्रत्ययेन निष्पन्नम्, तदनन्तरं प्रथमाया: वहुवचने पदमिदं सिद्धति। सन्दोहपदस्य पर्यायवाचिशब्दा: यथा- समूह:, सम्यग्, दोह:, दुग्धादि:। अस्य पदस्य व्याख्यायां तरङ्गिणीकारेण उक्तम्- " त्रिदशानां सन्दोहा: समूहा:। त्रिदशश्रेष्ठा इति वा"।[5] चषककारेण उक्तम्-" त्रिदशानां देवानां सन्दोहा: समूहा धौरेया इति यावत्"।[6] धुरं वहतीति धौरेय:।

'अज्ञानप्रशमाय'-इति पदेन एतत् बोद्धव्यं यत् मोक्षं प्रति पदार्थानां यत् तत्त्वज्ञानमस्ति तेन तत्त्वज्ञानेन मिथ्याज्ञानं दूरीभूतो भवति। प्रश्नो जायते पदार्थानां तत्त्वज्ञानादनन्तरमेव किं मोक्षं भवति? तदुत्तरे चषकेण गौतमाचार्यस्य स्वमतं समर्थयता उपन्यस्तम्-

**"दु:खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापाया-दपवर्गः "**[7]

तथापि अज्ञानपदपरामृष्टमिथ्याज्ञानतया केषां बोधो भवेत् इति न तेन स्पष्टीकृत: तदिदानीं स्पष्टीक्रियते। अनात्मन्यात्मेति बुद्धि:, दु:खे सुखत्वबुद्धि:, अनित्वे नित्यत्वबुद्धि:, सभये निर्भयत्वबुद्धि: इत्यादिकं यत् ज्ञानं तत् मिथ्याज्ञानमस्ति। एतादृशं मिथ्याज्ञानं हि भ्रमज्ञानम्। अत्र अज्ञानशब्देन भ्रमज्ञानं बोद्धव्यं न तु कस्यचित् वस्तुन: ज्ञानाभाव:। न ज्ञानमिति विग्रहेण "नञ्"[8] इत्यनेन समाससूत्रेण अज्ञानम् पदमिदं सिद्धति। नञर्था: षट्-प्रकारा: सादृश्यम् अभाव: अन्यत्वम् अल्पता अप्रशस्तता विरोधश्च। उच्यते –" तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।

**अप्राशस्त्यं विरोधश्च नञर्था: षट् प्रकीर्तिता:"॥**[9]

अत्र षट्सु नञर्थेषु विरोधार्थ: प्रयुज्यते। अज्ञानशब्देन अविद्या-भ्रमज्ञानविरुद्धज्ञानादि: बोध्यते। वस्तुन: ज्ञानाभाव: अपि च वस्तुनि मिथ्याज्ञानम् इत्यनयो: द्वयोर्मध्ये सूक्ष्मातिसूक्ष्मभेद: दृश्यते।

" मनसो " इत्युक्ते अन्त:करणस्य। " समस्ता " इति पदेन लौकिकालौकिकयो: बोध: जायते। उच्यते चषकटीकायाम्- " समस्ता लौकिकीरलौकिकीश्च मनसोऽन्त:करणस्य वृत्तीर्ज्ञानानि—"[10]

अत्र " भव "-शब्दस्यार्थ: संसार:। " भव "-इत्युक्ते दु:ख:।

मङ्गलाचरणे " चरणाम्बुजम् ", " हृत्पद्मे " इति पदयो: समास-गतभेद: द्वयो: तरङ्गिणी-चषकटीकयोर्मध्ये दरीदृश्यते। 'चरणम् अम्बुजम् इव' इति विग्रहेण अम्बुजम् इति उपमानेन सह उपमेयवाचकस्य चरणपदस्य "उपमितं व्याघ्रादिभि: सामान्या-प्रयोगे"[11] इति सूत्रेण उपमितकर्मधारयसमास: भवति तद्वत् " हृत् पद्मम् इव " इति विग्रहेण उपमितकर्मधारयसमासे कृते सति सप्तमीविभक्तियोगे च " हृत्पद्मे "-पदमिदं सिद्धति। तरङ्गिणीकार: तस्य टीकायां द्वयो: पदयो: समासनिर्यणे उपमितसमासस्य अर्थं गृहीतवान्। उच्यते " चरणाम्बुजमित्यत्र हृत्पद्म इत्यत्र च उत्तरपदार्थप्रधानो न मयूरव्यंसकादिसमास:, अपि तु पूर्वपदार्थ-प्रधानउपमितसमास: "।[12]

" उपमितं व्याघ्रादिभि: सामान्याप्रयोगे "-[13]इति सूत्रेण साधारण-धर्मस्य अप्रयोगे सुबन्तव्याघ्रादिभि: उपमानै: सह उपमेय-वाचकानां पदानाम् उपमितकर्मधारयसमास: भवति।

परन्तु चषककारेण " चरणाम्बुजम् ", " हृत्पद्मे " इति पदयो: रूपककर्मधारयसमास: स्वीकृतम्। " श्रीविष्णोर्लक्ष्मीनारायणस्य चरणाम्बुजं चरण एवाम्बुजं जलजं हृत्पद्मे हृदेव पद्मम्—"।[14] ' चरण एव अम्बुजम् ' इति विग्रहेण अम्बुजेन उपमानेन सह चरणस्य उपमेयस्य " रूपकमभेदे "- इत्यनेन च चरणाम्बुजम् इति पदं सिद्धति। ' हृदेव पद्मम् ' इति विग्रहेण पद्मेन उपमानेन सह हृदो: उपमेयस्य " रूपकमभेदे " इत्यनेन च ' हृत्पद्मम् ' पदमिदं सिद्धति। उपमानोपमेययोर्मध्ये अभेदं विवक्षिते य: समास: भवति तं रूपकमुच्यते। " रूपकमभेदे " इति न पाणिनिसूत्रम्, पाणिनिमते एतत् मयूरव्यंसकादौ परिगणितम्।

रूपकसमासे उपमानस्यार्थ: प्रधानं स्यात् किन्तु उपमितसमासे उपमेयस्यार्थ: प्रधानं भवति।

" तर्कामृतम् "-इति पदस्य समासनिर्णये द्वयो: टीकाकारयोर्मध्ये मतवैसाम्यं दृश्यते। तरङ्गिणीकारेण ' तर्कामृतम् ' इति पदे उपमितकर्मधारयसमास: स्वीकृतम्। " तर्का अमृतमिव " -इति विग्रहेण अमृतेन उपमानेन सह ' तर्का: ' उपमेयवाचकस्य पदस्य उपमितकर्मधारयसमास: स्यात्। " तर्कामृतं तर्का अमृतमिव "[15]

परन्तु चषककारेण तस्य टीकायां ' तर्कामृतम् ' इति पदे रूपकसमास: स्वीकृतम्। उच्यते- " मया तर्कामृतं तर्का द्रव्यादय: पदार्थास्त एवामृतं मुक्त्युपायत्वात्तन्यते लक्षणप्रतिपादनेन बुद्ध्युपा-रुढं क्रियते"।[16] अत्र ' तर्का एव अमृतम् ' इति विग्रहेण अमृतेन उपमानेन सह ' तर्का: ' इति उपमेयवाचकस्य पदस्य " रूपकमभेदे " इत्यनेन च रूपकसमास: भवति।

अत्र आशङ्का जायते यत् 'चरणाम्बुजम्', 'हृत्पद्मम्', 'तर्कामृतम्' इति उल्लिखितसमस्तपदानां समास: किंविध: स्यात्, उपमितकर्म-धारय: उत रूपककर्मधारय: अथवा उभयविध: ? इति चेत् अत्र विचार्य्यते। सामान्यत: एतादृशस्थले क्रियानुसारं समासनिर्णय: भवति। यथा- 'मुखचन्द्रं प्रकाशते' इत्यत्र मुखचन्द्रमिति पदे क: समास: भवेत् उपमितकर्मधारय: उत रूपककर्मधारय: इति तु प्रकाशते इति क्रियापदसापेक्ष्यं भवति। चन्द्रस्य एव प्रकाशनकार्यता वर्तते न तु मुखस्य। अत: मुखचन्द्रयो: उपमानोपमेययोर्मध्ये उपमानस्य चन्द्रस्य अर्थप्राधान्यात् रूपककर्मधारयसमास:। एवं यत्र उमानस्य प्राधान्यं संसुच्यते तत्र रूपककर्मधारय: यत्र च उपमेयस्य प्राधान्यं संसुच्यते तत्र उपमितकर्मधारयसमास: भवेत्। तथाहि 'माता मुखचन्द्रं चुम्बति' इत्यत्र 'चुम्बति' इति क्रियापदेन उपमेयस्य मुखस्यैव सम्बन्ध: वर्तते, मुखसैव चुम्बनसम्बवात् न तु चन्द्रस्य। अत: अत्र उपमेयभूतस्य मुखस्यार्थ: प्राधान्यात् उपमितकर्मधारय: भवति। एवमेव मङ्गलाचरणस्थेषु पदेषु अपि अवगन्तव्यम्, तथाहि 'चरणाम्बुजं हृत्पद्मे विनिधाय तर्कामृतं तन्यते' इति सान्वयवाक्ये 'चरणाम्बजम्' इत्यत्र उपमानोपमेययोर्मध्ये हृदये चरणस्यैव विधानं ग्रन्थकर्तु: इच्छा न तु पद्मस्य। अत: अत्र उपमेयभूतस्य चरणस्यैव प्राधान्यात् उपमितकर्मधारय एव तस्मिन् पदे युज्यते न तु रूपककर्मधारय:। एवं हृत्पद्मे इत्यत्र हृत् हृदयं पद्मं चेति यथाक्रमम् उपमेयं उपमानञ्च। विष्णो: चरणं हृदये एव धारयितुं इच्छति ग्रन्थकर्ता न तु पद्मे, अतएव हृत्पद्मे इत्यत्र हृद: हृदयस्य वा उपमेयस्य अर्थप्राधान्यात् उपमितकर्मधारय: समीचीयते। ननु चरनाम्बुजयो: उभययो: हृदि धारणसम्भवात् वशेषतया निधानसम्भवात् वा केवलं हृत्पद्मपदस्य उपमितकर्मधारयं स्वीकार्य्य चरणाम्बुजमिति पदस्य रूपककर्मधारय: स्वीक्रियताम् इति चेत् न तत्र ग्रन्थकर्तु: इच्छानुसारं समासकल्पनात्। यत: हृदये विष्णो:

चरणधारणमेव ग्रन्थकर्तुः इच्छा अतः तस्य इच्छानुसारं समासनिर्णयात् उपमेयस्य चरणपदस्य प्राधान्यात् च तत्रापि उपमितकर्मधारयसमासः स्वीकार्य्यः। सर्वं विश्लेष्य एतत् वक्तुं शक्यते यत् व्याकरणदृष्ट्या समासनिर्णयविषये चषककारापेक्षया तरङ्गिणीकारस्य मतम् अधीकं युक्तियुक्तम्।

किञ्च तर्कामृतमिति पदे अपि तन्यते विस्तार्य्यते इति क्रियापदसापेक्षात् उभयविधः कर्मधारयसमासः स्वीकर्तुं शक्यते, तत्र उपमेयभूतानां तर्काणाम् उपमानभूतस्य च अमृतस्य विस्तारसम्भवात्।

**पादटीका**

१. तर्का.- १.
२. महा.- ३/८५/१९
३. महा.- १/११३/२१
४. कु.स.- ३/१
५. त.ङ्गि.-पृ. १
६. च.क.-पृ.१
७. न्या.सू.-१/१/२
८. अष्टा.- २/२/६
९. पा.श,सम्पा.ड.सत्यनारायणः,पृ-२९९
१०. च.क.-पृ.-४
११. पा.सू.-२/१/५६
१२. त.टी- पृ-१
१३. पा.सू.-२/१/५६
१४. च.टी-पृ-३
१५. त.टी.-पृ- १
१६. च.टी-पृ- २

**शब्दसंकेताः**

त.मृ. – तर्कामृतम्
च.टी. – चषकटीका
पा.सू. – पाणिनीयसूत्रम्
त.ङ्ग.टी. -तरङ्गिणीटीका
पा.श. – पाणिनीय शब्दशास्त्र
महा. – महाभारतम्
कु.स. – कुमारसम्भवम्
अष्टा. - अष्टाध्यायी
न्या.सू. – न्यायसूत्रम्
भा.प. – भाषापरिच्छेदः

**सहायकग्रन्थपञ्जी**


१. श्रीजगदीशतर्कालङ्कारः, तर्कामृतम्, सम्पा. प्रो. पीयूषकान्तदीक्षितः, नाग पाब्लिशर्स, २००३।

२. न्यायदर्शनम्, वात्स्यायन-भाष्यसहतः, प्रथमखण्डः, सम्पा. महामहोपाध्यायः पण्डितः फणिभूषणतर्कवागीशः, संस्कृत वुक डिपो, कलकाता, २०१४।

३. महामहोपाध्यायश्रीजगदीशतर्कालङ्कारविरचितम्, तर्कामृतम्, विवृत्या सहितम्, दि ए शि या टि क सो सा ई टि, १९७४।

४. भीमाचार्यः, न्यायकोषः, सम्पा. वासुदेव अभ्यंकरः, वाराणसी, चौखम्बासुरभारतीप्रकाशनम्, १९२८।

५. विश्वनाथपञ्चाननभट्टाचार्यतर्कतीर्थः, भाषापरिच्छेदः(सिद्धान्तमुक्तावलीसहितः), सम्पा. श्रीमद्पञ्चानन-भट्टाचार्य्य-शास्त्री, महाबोधि वुक एजेन्सि, २०१६ (पुनर्मुद्रणम्)।

६. महर्षिपाणिनिः, अष्टाध्यायी, सम्पा. तपनशङ्करभट्टाचार्यः, संस्कृत बुक डिपो, कलकाता, २०१५।

७. महाकविकालिदासः, कुमारसम्भवम्, सञ्जीवनीटीका-सहितम्, सम्पा. डा. सुधाकर मालवीयः, चौखम्बा कृष्णदास अकादमी, वाराणसी।

८. पाणिनीय शब्दशास्त्र, सम्पा. ड. सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कलकाता, २०१६(पुनर्मुद्रणम्)।